इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्म मृत्यु-जरा-व्याधि-दुःख दोषानुदर्शनम् ॥
असक्तिरनभिष्वङ्गः पुत्त्रदारगृहादिषु ।
नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा" ॥
अतो ज्ञेयं वक्तु तत्रैवाध्याये । १२-१७ ॥
"ज्ञेयं यत्तत् प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ।
अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते ॥
सर्व्वतःपाणिपादन्तत् सर्व्वतोऽक्षिशिरोमुखम् ।
सर्व्वतःश्रुतिमल्लोके सर्व्वमावृत्य तिष्ठति ॥
सर्व्वेन्द्रियगुणाभासं सर्व्वेन्द्रियविवर्ज्जितम् ।
असक्तं सर्व्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥
वहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥
अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्त्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्व्वस्य विष्ठितम्" ॥
तथा च श्वेताश्वतरश्रुतौ आत्मज्ञानेनैव मुक्ति-
रिति स्फुटं दर्शयामास । यथा,—
"सर्व्वेन्द्रियगुणाभासं सर्व्वेन्द्रियविवर्ज्जितम् ।
सर्व्वस्य प्रभुमीशानं सर्व्वस्य शरणं वृहत्" ॥
"आत्मा गुहायां निहितोऽस्य जन्तो-
रणोरणीयान् महतो महीयान् ।
तमक्रतुं पश्यति वीतशोको
धातुः प्रसादान्महिमानमीशम्" ॥
महानिर्व्वाणतन्त्रे च । ५ । ११ ।
"परे ब्रह्मणि विज्ञाते समस्तैर्नियमैरलम् ।
तालवृन्तेन किं कार्य्यं लब्धे मलयमारुते" ॥

ननु किमिदानीं वागाडम्बराऽद्वैतवादं संस्थाप-
यितुं प्रयतते इति चेत् दर्शयामः ।
तथा च श्रीविष्णुधर्म्मे,—
"परात्मनो मनुष्येन्द्र विभागो हि न कल्पितः ।
न्याये तस्यात्मपरयोर्विभागाभावएव हि ॥
आत्मा क्षेत्रज्ञसंज्ञोऽयं संयुक्तः प्राकृतैर्गुणैः ।
तैरेव विगतः शुद्धः परमात्मा निगद्यते ॥
अनादिसम्बन्धवत्या क्षेत्रज्ञोऽहमविद्यया ।
युक्तः पश्यति भेदेन ब्रह्मन्वात्मनि संस्थितम्" ॥
तथाहि श्वेताश्वतरश्रुतिभाष्यष्टतवशिष्ठवचन
प्रश्नपूर्व्वकं दर्शितम् । यथा,—
"यद्यात्मा निर्गुणः शुद्धः सदानन्दोऽजरोऽमरः ।
संसृतिः कस्य तात! स्यात् मोक्षो वाऽविद्यया विभो ॥
क्षेत्रनाशे कथं तस्य ज्ञायते भगवान् यतः ।
यथावत् सर्व्वमेतं मे वक्तुमर्हसि साम्प्रतम् ॥
तस्यैव नित्यशुद्धस्य सदानन्दमयात्मनः ।
अवच्छिन्नस्य जीवस्य संसृतिः कीर्त्यते बुधैः ॥
एकएव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥
भ्रान्त्यारूढ़ः स एवात्मा जीवसंज्ञः सदा भवेत् ॥"

तथा च शुक्रशिष्यो गौड़पादाचार्य्यः ॥
"यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते ।
न सर्व्वे सम्प्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः" ॥
तस्मादद्वितीये परमात्मन्युपाधितो जीवेश्वरयो-
र्जीवानाञ्च परस्परं भेदव्यवस्थायाः सिद्धत्वान्न
विशुद्धसत्त्वोपाधेरीश्वरस्याविशुद्धोपाधिजीवगताः
सुखदुःखमोहाज्ञानादयः ॥ तथा च भगवान्
पराशरः ।

ज्ञानात्मकस्यामलसत्त्वराशे-
रपेतदोषस्य सदा स्फुटस्य ।
किं वा जगत्यस्ति समस्तपुंसा-
मज्ञातमस्यास्ति हृदि स्थितस्य" ॥

कथं तर्ह्युपाधिकभेदेन बन्धमुक्त्यादिव्यवस्था सोपा-
धिकानां तेषां वा सोपाधिकेश्वरस्य वा स्वरूप-
स्येति इत्याशङ्क्य दृष्टान्तपूर्व्वकं व्यवस्थां दर्शयति ॥
"एकस्तु सूर्य्यो बहुधा जलाधारेषु दृश्यते ।
आभाति परमात्मा च सर्व्वोपाधिषु संस्थितः" ॥
"ब्रह्म सर्व्वशरीरेषु वाह्ये चाभ्यन्तरे स्थितम् ।
आकाशमिव भूतेषु बुद्धावात्मा न चान्यथा" ॥
एवं सति यथा बुद्ध्या देहोऽहमिति मन्यते ।
'अनात्मन्यात्मता भ्रान्त्या सा स्यात्संसारवर्त्तिनी' ॥
सर्व्वैर्विकल्पैर्हीनस्तु शुद्धो बुद्धोऽजरोऽमरः ।
प्रशान्तो व्योमवद्व्यापी चैतन्यात्मा सकृत्प्रभुः ॥
धूमाभ्रधूलिभिर्व्योम यथा न मलिनीयते ।
प्राकृतैस्तथात्मा विकारैः पुरुषस्तथा ॥
यथैकस्मिन् घटाकाशे जलैर्धूमादिभिर्युते ।
नान्ये मलिनतां यान्ति दूरस्थाः कुत्रचित् क्वचित् ॥
यथा द्वन्द्वैरनेकैस्तु जीवे च मलिनीकृते ।
एतस्मिन्नापरे जीवा मलिनाः सन्ति कुत्रचित्" ॥

परं नतु केवलं प्रकृतेः पृथक्पुरुषचैतन्यज्ञान-
मात्रेण ब्रह्मज्ञानं सम्भवितुमर्हति । यदि चैके
पण्डिताः पृथग्ज्ञानेनैव सिद्धिः स्यादिति मन्यन्ते
किन्तु नैव श्रुतय एवं परिचक्षते । यथा, श्वेताश्व-
तरोपनिषदि "ज्ञाज्ञौ द्वावजावीशानीशावजा
ह्येका भोक्तृभोग्यार्थयुक्ता अनन्तश्चात्मा विश्व-
रूपो ह्यकर्त्ता त्रयं यदा विन्दते ब्रह्ममेतत्" ॥
अतएव ब्रह्मजिज्ञासोर्योगिनः श्रवणादिसम्पन्न-
तत्त्वविज्ञानेनैव मुक्तिः स्यात् अन्यथा भ्रमएव ॥
यथा, तत्रैव "क्षरं प्रधानममृताक्षरं हरः
क्षरात्मानावीशते देवएकः । तस्याभिधानात्
योजनात् तत्त्वभावात् भूयश्चान्ते विश्वमाया-
निवृत्तिः ॥ ज्ञात्वा देवं सर्व्वपाशापहानिः क्षीणैः
क्लेशैर्जन्ममृत्युप्रहाणिः। तस्याभिध्यानात्तृतीयं देह-
भेदे विश्वैश्वर्य्य केवल आप्तकामः" ॥ परं योगा-
भ्यासादृते नैव कदाचित् तत्त्वज्ञानस्योत्पत्ति-
रिति श्रुतिस्मृत्यादीनां ज्ञानप्रतिपादकशास्त्रा-
णामुपदेशो दृश्यते यदि च पूर्व्वपूर्व्वप्रकरणे पुराण-
प्रभृतिविहितयोगादिमतं प्रदर्शितं तथापि तत्-
दृढ़ीकरणाय वैदिकमतमिदानीं प्रदर्शयामः । यथा
यजुर्व्वेदोक्तश्वेताश्वतरीययोगप्रकरणम् । ॐ "युञ्जा-
नः प्रथमम् मनस्तत्त्वाय सविता धियः ॥ अग्निं
ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ॥ १ ॥

युक्तेन मनसा वयं देवस्य सवितुः सवे स्वर्गेयाय
शक्त्यै ॥ २ ॥
युक्ताय मनसा देवान् सुवर्य्यतो धिया दिवं ।
वृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् ॥३॥
युञ्जते मन उत युञ्जते धियो
विप्रा विप्रस्य वृहतो विपश्चितः ॥
विहोत्रा दधे वयुना विदेक इत् ।
मही देवस्य सवितुः परिष्टुतिः ॥ ४ ॥
युजे वां ब्रह्म पूर्व्यं नमोभिः
विश्लोका यन्ति पथ्येव सूराः" ॥ ५ ॥
परन्तु आत्मज्ञानविशदीकरणाय दक्षसंहितैव
श्रेयसी जीवानामिति प्रदर्शयितुं भूयोऽप्यनुस-
रामः । यथा,
"ऊरुस्थोत्तानचरणः सव्ये न्यस्येतरं करम् ।
उत्तानं किञ्चिदुन्नाम्य मुखं विष्टभ्य चोरसा ॥
निमीलिताक्षः सत्त्वस्थो दन्तैर्दन्तानसंस्पृशन् ।
तालुस्थाचलजिह्वश्च संवृतास्यः सुनिश्चलः ।
संनिरुध्येन्द्रियग्रामं नातिनीचोच्छ्रितासनः ।
द्विगुणं त्रिगुणं वापि प्राणायाममुपक्रमेत्" ॥
किन्तुएवं मा मन्यध्वं यत् गृहान्निःसृत्य अरण्यवा-
सादौ योगाभ्यासतत्त्वज्ञानादेः सुगमो भवेत्
इत्यत्र यथाह दक्षः सप्तमाध्याये ।
"लोको वशीकृतो येन येन चात्मा वशीकृतः ।
इन्द्रियार्थो जितो येन तं योगं प्रब्रवीम्यहं ॥
प्राणायामस्तथा ध्यानं प्रत्याहारस्तु धारणा ।
तर्कश्चैव समाधिश्च षड़ङ्गो योग उच्यते ॥
नारण्यसेवनाद्योगो नानेकग्रन्थचिन्तनात् ।
व्रतैर्यज्ञैस्तपोभिश्च न योगः कस्यचित् भवेत् ॥
न च पद्मासनात् योगो न नासाग्रनिरीक्षणात् ।
न च शास्त्रातिरिक्तेन शौचेन स भवेत् क्वचित् ॥
न मौनमन्त्रकुहकैरनेकैः सुकृतैस्तथा ।
लोकयात्राभियुक्तस्य योगो भवति कस्यचित् ॥
अभियोगात् तथाभ्यासात् तस्मिन्नेव तु निश्चयात् ।
पुनः पुनश्च निर्व्वेदाद् योगः सिध्यति नान्यथा" ॥
अतएव निर्व्वेदादृते केवलं तपःस्वाध्यायादिभिर्न
योगसिद्धिः शास्त्रकृद्भिरनुमोदनीया । किन्तु
आदरनैरन्तर्य्येण आत्मचिन्तादयएव ब्रह्मलब्धेः
सदुपाया इति बोध्यम् यथा तत्रैव ।
"आत्मचिन्ताविनोदेन शौचक्रीड़नकेन च ।
सर्व्वभूतसमत्वेन योगः सिध्यति नान्यथा ॥
यश्चात्मनि रतो नित्यमात्मक्रीड़स्तथैव च ।
आत्मनिष्ठश्च सततमात्मन्येव स्वभावतः ॥
रतश्चैव स्वयं तुष्टः सन्तुष्टो नान्यमानसः ।
आत्मन्येव सुतृप्तोऽसौ योगस्तस्य प्रसिध्यति ॥
सुप्तोऽपि योगयुक्तः स्याज्जाग्रच्चापि विशेषतः ।
ईदृक्चेष्टः स्मृतः श्रेष्ठो गरिष्ठो ब्रह्मवादिनाम्" ॥

परन्तु विषयासक्तिवर्ज्जनं विना क्वापि कस्य-
चिदपि आत्मसिद्धिर्न प्रजायते । यथा तत्रैव,—
"य आत्मव्यतिरेकेण द्वितीयं नैव पश्यति ।
ब्रह्मीभूय स एवं हि दक्षपक्ष उदाहृतः ॥
विषयासक्तचित्तो हि यतिर्मोक्षं न विन्दति ।
यत्नेन विषयासक्तिं तस्माद् योगी विवर्ज्जयेत्" ॥